श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ तृतीयः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ तृतीयः सर्गः ॥

अथ जगन्ति बभूवुरनाविला-
न्यतिमिरा हरितः प्रचकाशिरे।
अभजदेव निशा दिवसश्रियं
जननभाजिनि देवदिवाकरे॥ ३.१ ॥

ननृतुरप्सरसो दिवि नन्दिताः
किमपि गीतमगीयत किन्नरैः।
श्रुतिसुखैस्समतोषयत स्वनैः
अमरदुन्दुभिरानकदुन्दुभिम्॥ ३.२ ॥

दशसु तत्र दिशास्वशरीरिणी
जयजयेति बभूव सरस्वती।
अजितमेकमगोचरयत् स्वयं
स्वरसवृत्तिरसावसुरान्तकम्॥ ३.३ ॥

अनतिवेलसमीरणचोदितैः
शिशिरशीकरशीभरिताम्बरैः।
जलधरैरभितो दिवि दध्वने
सुरगजैरिव सूचितमङ्गलैः॥ ३.४ ॥

ववुरथो मरुतस्त्रिदशाङ्गना-
वदनसौरभसारभृतः शुभाः।
मुदितनिर्जरमुक्तसुरद्रुम-
प्रसववृष्टिमधुद्रवमेदुराः॥ ३.५ ॥

मधुरिपोरवतारमहोत्सवे
मुमुदिरे मधुरापुरदेवताः।

यदभिगन्तरि भक्तजने वरं
    ददुरशेषमतन्द्रितचेतसः॥ ३.६ ॥

अवदधानधियो मुनयस्तदा
    यदनधीतमधीतवदञ्जसा।
निगमजातमशेषमवेक्ष्य तत्
    निरविशन्निव मुक्तिमयीं दशाम्॥ ३.७ ॥

प्रसदनं शरदागमसम्भवं
    नभसि मासि नदीभिरुपाददे।
महितयोगविदां मतिभिः समं
    श्रुतिभिरप्यनुपप्लवनीतिभिः॥ ३.८ ॥

निखिलचेतनमानस निस्सृताः
    कलुषताः समुदेत्य किल क्षणात्।
विविशुरम्भ इव स्वयमापगाः
    जलनिधेरिव भोजपतेर्मनः॥ ३.९ ॥

असुरवीरगृहाणि पृथग्विधैः
    अशुभशंसिभिरानशिरे मुहुः।
अमरराजपुरेषु जजृम्भिरे
    शुभनिमित्तशतानि पुनः पुनः॥ ३.१० ॥

चरमतश्च ऋणादिव देवकी-
    पतिरमुच्यत शृङ्खलतः स्थिरात्।
निखिलबन्धनिवर्तकसन्निधौ
    विगलनं निगलस्य किमद्भुतम्॥ ३.११ ॥

उदितमात्मनि देवकसम्भवा
    दनुजभेदनमङ्कगतं दधौ।
कमभि काञ्चनभूभृदधित्यका
    हरिहयोपलशृङ्गमिवाद्भुतम्॥ ३.१२ ॥

विधृतशङ्खरथाङ्गगदाम्बुजः
शबलितः शुभया वनमालया।
पितुरसूत मुदं पृथुकस्तदा
जलधिडिम्बनिभो जननीधृतः॥ ३.१३॥

पितरमब्जभुवामनपायिनं
प्रियतमाङ्कगतं परिपश्यता।
स विभुरानकदुन्दुभिना महान्
अवितथैः स्वगुणैरभितुष्टुवे॥ ३.१४॥

प्रणिपतामि भवन्तमनन्यधीः
अखिलकारणमाश्रिततारणम्।
अनुगमादनिदम्प्रथमा गिरः
किमपि यत्पदमेकमधीयते॥ ३.१५॥

विषमकर्मविपाकपरम्परा-
विवशवृत्तिषु देहिषु दुस्तरम्।
करुणया तव देव कटाक्षिताः
कतिचिदेव तरन्ति भवार्णवम्॥ ३.१६॥

त्वदनुभावमहोदधिशीकरैः
अवशपातिभिराहितशक्तयः।
अवधिभेदवतीमुपभुञ्जते
स्वपदसम्पदमब्जभवादयः॥ ३.१७॥

श्रुतिकिरीटशुभाश्रयविग्रहः
परमसत्त्वनिधिः प्रतिपद्यसे।
जगदनुग्रहमारुतचोदितो
विविधरूपतरङ्गविकल्पनाम्॥ ३.१८॥

त्वयि न देव यदायतते न तत्
जगति जङ्गममन्यदथापि वा।

इति महिम्नि तव प्रमिते परं
    विभजने विविधैः स्थितमागमैः॥ ३.१९ ॥

अखिललोकपितुस्तव पुत्रतां
    अहमयाचमनन्यमनोरथः।
वरद वाञ्छितदानधृतव्रते
    त्वयि तदेवमयत्नमपच्यत॥ ३.२० ॥

अवनिभारनिराकरणार्थिनां
    क्रतुभुजामभिलाषमवन्ध्ययन्।
जितरिपूणि बहूनि दयानिधे
    विहरणानि विधातुमिहार्हसि॥ ३.२१ ॥

दनुजमोहनदोहलिना त्वया
    सहजलाञ्छनसंवरणं क्षमम्।
तदधुना शमयन् मम साध्वसं
    यवनिकामधिगच्छ यथेप्सितम्॥ ३.२२ ॥

इति सभीतमवेक्ष्य दयानिधिः
    स्मितमुखो वसुदेवमभाषत।
त्वमसि मे जनकः किमिहान्यथा
    किमपि तात मुधा कथितं त्वया॥ ३.२३ ॥

इयममर्त्यपितुस्तव गेहिनी
    दिविषदां जननी मम चानघा।
अभिमतं युवयोरनवग्रहं
    समयभावि मयैव समर्थ्यते॥ ३.२४ ॥

यदि बिभेषि भजामि मनुष्यतां
    अथ च मां नय नन्दगृहं क्षणात्।
दुहितरं च समानय तस्य तां
    गतभयो भव दूरगते मयि॥ ३.२५ ॥

अथ निशम्य नियोगमभङ्गुरं
    मधुजितो मधुराक्षरमन्थरम्।
हितमिदं प्रतिपद्य तमाददे
    गुरुतरं कृपया लघुतां गतम्॥ ३.२६ ॥

तुहिनभानुदिवाकरलोचनं
    निगमनिःश्वसितं स्वसुतस्य तत्।
अनुबभूव मुहुर्मुहुरादरात्
    अनघमाननमानकदुन्दुभिः॥ ३.२७ ॥

श्रुतिसुगन्धितदाननचन्द्रिका-
    मुषितमोहतमा मुनिसन्निभः।
अधिजगाम स तन्मयतां क्षणात्
    अनिमिषत्वमुत प्रतिसन्दधे॥ ३.२८ ॥

जिगमिषुः स दिशो दश यादवः
    सकृदवैक्षत साध्वसविह्वलः।
अनघवैभवमर्भकमुद्वहन्
    अमितगुप्तिनिरुद्धगतौ गृहे॥ ३.२९ ॥

विजघटे सहसैव कवाटिका
    व्रजमथ व्रजतो यदुभूभृतः।
उपलकल्पमशेरत रक्षकाः
    सरणिमादिदिशुर्गृहदेवताः॥ ३.३० ॥

क्षरदसूनिव यामिकरक्षकान्
    मुषितमञ्जुगिरः शुकशारिकाः।
यदुकुलेन्दुरपश्यदमीलितान्
    परिजनानपि चित्रगतानिव॥ ३.३१ ॥

उपयतो विशिखां सदनान्तरात्
    कुवलयाभकुमारतनुत्विषा।

शतमखोपलमेचकया द्रुतं
शमितसन्तमसा हरितो बभुः॥ ३.३२॥

श्रुतिमयो विहगः परितः प्रभुं
व्यचरदाशु विधूतनिशाचरः।
अनुजगाम च भूधरपन्नगः
स्फुटफणामणिदीपगणोद्वहः॥ ३३॥

दिनकरोपमदीधितिभिस्तदा
दनुजदेहविदारणदारुणैः।
परिगतः किल पञ्चभिरायुधैः
यदुपतिः प्रजहावसहायताम्॥ ३.३४॥

प्रगुणमिन्दुनिवेदितपद्धतिः
यदुकुलेन्दुरथो यमुनानदीम्।
परमपूरुषमक्षतपौरुषः
पतगराज इवाशु वहन् ययौ॥ ३.३५॥

तनुतरङ्गपृषत्कणशीतलः
सुरभिकैरवसौहृदवासितः।
अभिसमेतमसेवत मारुतो
यमुनया प्रहितो यदुपुङ्गवम्॥ ३.३६॥

पवनकम्पितपल्लवपाणिका
प्रहितपुष्पभरा पदवीमुखे।
उपजुहाव किल भ्रमरस्वनैः
यदुपतिं यमुनोपवनस्थली॥ ३.३७॥

निमिषितासितनीरजलोचना
मुकुलिताब्जमुखी सवितुः सुता।
ललितदीनरथाङ्गयुगस्वना
कुहकदैन्यमशोचदिव प्रभोः॥ ३.३८॥

विकचकैरवतारकिताकृतिं
तनुमतीमिव शारदयामिनीम्।
त्वरितमम्बुनिधेरभिसारिकां
तरितुमैहत सत्यसमीहितः॥ ३.३९ ॥

भवति किं नु भविष्यति वा किमि-
त्यनवधारितशौरिविहारया।
चकितयेव विरोचनकन्यया
विधुतवीचिकरं किल विव्यथे॥ ३.४० ॥

घनतमःपरिपाकमलीमसैः
गुरुभिरूर्मिगणैरनुपप्लुतः।
अतितताार दिनाधिपतेः सुतां
अनघयोगमना इव संसृतिम्॥ ४१ ॥

यदुपतेर्यमुना त्वरितं यतः
प्रतियतश्च समर्पितपद्धतिः।
स्वयममर्त्यमदावलमज्जनी
चरणलङ्घ्यजला समजायत॥ ३.४२ ॥

अजनि पश्चिमतो भृशमुन्नता
रविसुता पुरतः स्थलशेषिता।
अधिरुरोह पदं किमसौ हरेः
प्रतिययौ यदि वा पितरं गिरिम्॥ ३.४३ ॥

अकृतसेतुमनाकलितप्लवां
जननसिन्धुदृढप्लवमुद्वहन्।
रविसुतामतिलङ्घ्य रमापतिं
सपदि घोषसमीपमुपानयत्॥ ३.४४ ॥

अथ कयाचन कारणनिद्रया
विवशसुप्तजनं व्रजमाविशत्।

धनदपत्तनसम्पदि यत्र सा
    स्वसुतमग्र्यमसूयत रोहिणी॥ ३.४५ ॥

उपगते वसुदेवसुतेऽन्तिकं
    नरकवैरिणि नन्दकुटुम्बिनी।
अरणिसम्भवपावकसङ्गमात्
    अभजताध्वरवेदिरिव श्रियम्॥ ३.४६ ॥

न्यधित नन्दवधूसविधे सुतं
    द्रुतमुपादित गोपकुमारिकाम्।
अथ निनाय च देवकनन्दनी-
    शयनमानकदुन्दुभिराशु ताम्॥ ३.४७ ॥

अनवबुद्धजनार्दनकन्यका
    विनिमयस्त्वथ भोजगणेश्वरः।
दृषदि तामभिहन्तुमपातयत्
    प्रतिजघान च सा चरणेन तम्॥ ३.४८ ॥

नृपतिराशु पदा निहतस्तया
    निपतितोदितकन्तुकवद्भवन्।
दवसमाहतशैलनिभः क्रुधा
    दरनिमीलितदृष्टिरदूयत॥ ३.४९ ॥

उदपतत् दिवमुग्रघनस्वना
    युवतिरूपयुगात्ययशर्वरी।
असुरघातिभिरष्टभिरायुधैः
    अलघुभिश्चपलाभिरिवाश्रिता॥ ३.५० ॥

अथ च भोजनियन्तुरयन्त्रिता
    दनुजहन्तुरुदन्तमुदैरिरत्।
पटु गभीरमुदारमनाकुलं
    हितमविस्तरमर्थ्यमविप्लवम्॥ ३.५१ ॥

अहमशेषसुरासुरमोहनी
    यवनिका मधुकैटभमर्दिनः।
प्रबलशुम्भनिशुम्भनिषूदने
    प्रणिहिता हतया तव किं मया॥ ३.५२॥

वसति नन्दगृहे विबुधद्विषां
    दमयिता वसुदेवसमुद्भवः।
अयमसौ तव नाशयितेति सा
    दरमुदीर्य जगाम यथेप्सितम्॥ ३.५३॥

मधुहिरण्यनिभो मधुरापतिः
    दिनहुताशनदीनदशां गतः।
श्वसितजल्पितवेपितहुङ्कृतैः
    अरतिमायतभीतिरसूचयत्॥ ३.५४॥

जडमतिः स जनार्दनमायया
    विहसितस्त्रपया जनितव्यथः।
अपकृतं वसुदेवममोचयत्
    दयितया सह दीनविलापया॥ ३.५५॥

किमपि चिन्तितमागतमन्यथा
    किमिदमित्यवशादुपजातया।
विषविदूषितयेव मनीषया
    मुहुरदूयत मोहविचेष्टितः॥ ३.५६॥

अविषये विपदामसुरान्तके
    पुनरियेष निकारपरम्पराम्।
नियतिरेकमुखी दुरतिक्रमा
    कृतधिया किमुताऽऽविलचेतसा॥ ३.५७॥

परिबभूव चुकोप विसिष्मये
    परिजहास हरिं प्रजगर्ज च।

परिणतेन भवान्तरवासना-
ऽऽग्रहगुणेन भजन् भवितव्यताम्॥ ३.५८ ॥

क्वचन धामनि कंसनिवेदिते
सभयमानकदुन्दुभिरावसत्।
स्मृतिगतेन सुतेन सजीविता
दिनशतानि निनाय च देवकी॥ ३.५९ ॥

विगतकन्यकया च यशोदया
नियतिसम्भृतनिर्भरनिद्रया।
चिरसमागतजागरयाऽन्तिके
हरिरपत्यमदृश्यत धन्यया॥ ३.६० ॥

यदवबुद्धनिराकुलनीतिभिः
मुनिगणैरधुनापि विमृग्यते।
तदिदमागममौलिविभूषणं
विधिवशादभवत् व्रजभूषणम्॥ ३.६१ ॥

अनघवत्समनाकुलधेनुकं
प्रचुरदुग्धमचोरभयोद्भवम्।
व्रजमनामयविश्वजनं विभुः
कृतयुगास्पदकल्पमकल्पयत्॥ ३.६२ ॥

अजनि गोपगृहेषु मनोरमैः
अमितकान्तिभिरप्सरसां गणैः।
यदनुभूतिरसेन समेष्यतः
शरणयादवशैशवयौवने॥ ३.६३ ॥

सुरमहीसुरतोषणमादरात्
नवमुपादित नन्द उदारधीः।
तरलगोपगणागमसङ्कुलं
तनयजन्ममहोत्सवमद्भुतम्॥ ३.६४ ॥

अधिचकार वदान्यमणेः श्रियं
    व्यधित कल्पतरोरनुकल्पताम्।
अजनयच्च सुतप्रसवोत्सवे
    महति मेघविकत्थनमोघताम्॥ ३.६५ ॥

निधिमनन्तमिव स्वयमुत्थितं
    निरवधिं निजभागमिवोदितम्।
व्रजभुवः प्रतिलभ्य रमापतिं
    जहसुरैन्द्रमसारतरं पदम्॥ ३.६६ ॥

पुत्रं प्रसूय तपसा पुरुषं पुराणं
    कालं चिरं विधिवशात् कृतविप्रकर्षौ।
शङ्काकलङ्कितधियावपि दम्पती तौ
    तद्वैभवस्मरणशान्तरुजावभूताम्॥ ३.६७ ॥

नन्दसद्मनि नवेन्दुसन्निभौ
    वासमेत्य वसुदेवनन्दनौ।
वृद्धिमापतुरनेहसा स्वयं
    स्वादुभोगजननीं सुपर्वणाम्॥ ३.६८ ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
तृतीयः सर्गः ॥